# Shri Mahaganapati Mantravigraha Kavacham

# શ્રીમહાગણપતિ મન્ત્રવિગ્રહકવચમ્

## Document Information

Text title : Mahaganapati Mantravigraha Kavacham

File name : mahAgaNapatimantravigrahakavacham.itx

Category : ganesha, kavacha

Location : doc_ganesha

Transliterated by : Krishna Vallapareddy krishna321 at hotmail.com

Proofread by : Krishna Vallapareddy

Description/comments : Vighneshvara Stuti Manjari I, (ed.) S. V. Radhakrishna Sastri

Latest update : June 2, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 2, 2021

*sanskritdocuments.org*

# શ્રીમહાગણપતિ મન્ત્રવિગ્રહકવચમ્

ૐ અસ્ય શ્રીમહાગણપતિમન્ત્રવિગ્રહકવચસ્ય ।
શ્રીશિવ ઋષિઃ । દેવીગાયત્રી છન્દઃ । શ્રી મહાગણપતિર્દેવતા ।
ૐ શ્રીँ હ્રીँ ક્લીँ ગ્લૌँ ગँ બીજાનિ ।
ગણપતયે વરવરદેતિ શક્તિઃ ।
સર્વજનં મે વશમાનય સ્વાહા કીલકમ્ ।
શ્રી મહાગણપતિપ્રસાદસિદ્ધ્યતે જપે વિનિયોગઃ ।
ૐ શ્રીँ હ્રીँ ક્લીँ અઙ્ગુષ્ઠાભ્યાં નમઃ - હૃદયાય નમઃ ।
ગ્લૌँ ગँ ગણપતયે તર્જનીભ્યાં નમઃ - શિરસે સ્વાહા ।
વરવરદ મધ્યમાભ્યાં નમઃ - શિખાયૈ વષટ્ ।
સર્વજનં મે અનામિકાભ્યાં નમઃ - કવચાય હુँ ।
વશમાનય કનિષ્ઠિકાભ્યાં નમઃ - નેત્રત્રયાય વૌષટ્ ।
સ્વાહા કરતલ કરપૃષ્ઠાભ્યાં નમઃ - અસ્ત્રાય ફટ્ ।

ધ્યાનમ્ -
બીજાપૂરગદેક્ષુકાર્મુકરુજા ચક્રાબ્જપાશોત્પલ
    વ્રીહ્યગ્રસ્વવિષાણરત્નકલશપ્રોદ્યત્કરામ્ભોરુહઃ ।
પાયાદ્વલ્લભયા સપદ્મકરયાશ્લિષ્ટોજ્વલદ્ભૂષયા
    વિશ્વોત્પત્તિવિપત્તિસંસ્થિતિકરો વિઘ્નેશ ઇષ્ટાર્થદઃ ।
(ઇતિ ધ્યાત્વા । લँ ઇત્યાદિ માનસોપચારૈઃ સમ્પૂજયેત્)
ૐ ઓઙ્કારો મે શિરઃ પાતુ શ્રીँકારઃ પાતુ ભાલકમ્ ।
હ્રીँ બીજં મે લલાતેઽવ્યાત્ ક્લીँ બીજં ભ્રૂયુગં મમ ॥ ૧॥

ગ્લૌँ બીજં નેત્રયોઃ પાતુ ગँ બીજં પાતુ નાસિકામ્ ।
ગँ બીજં મુખપદ્મેઽવ્યાદ્ મહાસિદ્ધિફલપ્રદમ્ ॥ ૨॥

ણકારો દન્તયોઃ પાતુ પકારો લમ્બિકાં મમ ।
તકારઃ પાતુ મે તાલ્વોર્યેકાર ઓષ્ઠયોર્મમ ॥ ૩॥

વકારઃ કણ્ઠદેશેઽવ્યાદ્ રકારશ્ચોપકણ્ઠકે ।
દ્વિતીયસ્તુ વકારો મે હૃદયં પાતુ સર્વદા ॥ ૪॥

રકારસ્તુ દ્વિતીયો વૈ ઉભૌ પાર્શ્વૌ સદા મમ ।
દકાર ઉદરે પાતુ સકારો નાભિમણ્ડલે ॥ ૫॥

ર્વકારઃ પાતુ મે લિઙ્ગં જકારઃ પાતુ ગુહ્યકે ।
નકારઃ પાતુ મે જઙ્ઘે મેકારો જાનુનોર્દ્વયોઃ ॥ ૬॥

વકારઃ પાતુ મે ગુલ્ફૌ શકારઃ પાદયોર્દ્વયોઃ ।
માકારસ્તુ સદા પાતુ દક્ષપાદાઙ્ગુલીષુ ચ ॥ ૭॥

નકારસ્તુ સદા પાતુ વામપાદાઙ્ગુલીષુ ચ ।
યકારો મે સદા પાતુ દક્ષપાદતલે તથા ॥ ૮॥

સ્વાકારો બ્રહ્મરૂપાખ્યો વામપાદતલે તથા ।
હાકારઃ સર્વદા પાતુ સર્વાઙ્ગે ગણપઃ પ્રભુઃ ॥ ૯॥

પૂર્વે માં પાતુ શ્રીરુદ્રઃ શ્રીઁ હ્રીઁ ક્લીઁ ફટ્ કલાધરઃ ।
આગ્નેય્યાં મે સદા પાતુ હ્રીઁ શ્રીઁ ક્લીઁ લોકમોહનઃ ॥ ૧૦॥

દક્ષિણે શ્રીયમઃ પાતુ ક્રીઁ હ્રૂઁ ઐઁ હ્રીઁ હ્સ્રૌઁ નમઃ ।
નૈરૃત્યે નિરૃતિઃ પાતુ આઁ હ્રીઁ ક્રૌઁ ક્રૌઁ નમો નમઃ ॥ ૧૧॥

પશ્ચિમે વરુણઃ પાતુ શ્રીઁ હ્રીઁ ક્લીઁ ફટ્ હ્સ્રૌઁ નમઃ ।
વાયુર્મે પાતુ વાયવ્યે હૂઁ હ્રીઁ શ્રીઁ હ્સ્ફ્રેઁ નમો નમઃ ॥ ૧૨॥

ઉત્તરે ધનદઃ પાતુ શ્રીઁ હ્રીઁ શ્રીઁ હ્રીઁ ધનેશ્વરઃ ।
ઈશાન્યે પાતુ માં દેવો હ્રૌઁ હ્રીઁ જૂઁ સઃ સદાશિવઃ ॥ ૧૩॥

પ્રપન્નપારિજાતાય સ્વાહા માં પાતુ ઈશ્વરઃ ।
ઊર્ધ્વં મે સર્વદા પાતુ ગઁ ગ્લૌઁ ક્લીઁ હ્સ્રૌઁ નમો નમઃ ॥ ૧૪॥

અનન્તાય નમઃ સ્વાહા અધસ્તાદ્દિશિ રક્ષતુ ।
પૂર્વે માં ગણપઃ પાતુ દક્ષિણે ક્ષેત્રપાલકઃ ॥ ૧૫॥

પશ્ચિમે પાતુ માં દુર્ગા ઐઁ હ્રીઁ ક્લીઁ ચણ્ડિકા શિવા ।
ઉત્તરે વટુકઃ પાતુ હ્રીઁ વઁ વઁ વટુકઃ શિવઃ ॥ ૧૬॥

સ્વાહા સર્વાર્થસિદ્ધેશ્ચ દાયકો વિશ્વનાયકઃ ।
પુનઃ પૂર્વે ચ માં પાતુ શ્રીમાનસિતભૈરવઃ ॥ ૧૭॥

આગ્નેય્યાં પાતુ નો હ્રીઁ હ્રીઁ હૃઁ ક્રૌઁ ક્રૌઁ રુરુભૈરવઃ ।
દક્ષિણે પાતુ માં ક્રૌઁ ક્રૌઁ હ્રૈઁ હ્રૈઁ મે ચણ્ડભૈરવઃ ॥ ૧૮॥

નૈરૃત્યે પાતુ માં હ્રીઁ હ્રૂઁ હ્રૌઁ હ્રીઁ હ્રીઁ હ્સ્રૈઁ નમો નમઃ ।
સ્વાહા મે સર્વભૂતાત્મા પાતુ માં ક્રોધભૈરવઃ ॥ ૧૯॥

પશ્ચિમે ઈશ્વરઃ પાતુ ક્રીઁ ક્લીઁ ઉન્મત્તભૈરવઃ ।
વાયવ્યે પાતુ માં હ્રીઁ ક્લીઁ કપાલી કમલેક્ષણઃ ॥ ૨૦॥

ઉત્તરે પાતુ માં દેવો હ્રીઁ હ્રીઁ ભીષણભૈરવઃ ।
ઈશાન્યે પાતુ માં દેવઃ ક્લીઁ હ્રીઁ સંહારભૈરવઃ ॥ ૨૧॥

ઊર્ધ્વં મે પાતુ દેવેશઃ શ્રીસમ્મોહનભૈરવઃ ।
અધસ્તાદ્ વટુકઃ પાતુ સર્વતઃ કાલભૈરવઃ ॥ ૨૨॥

ઇતીદં કવચં દિવ્યં બ્રહ્મવિદ્યાકલેવરમ્ ।
ગોપનીયં પ્રયત્નેન યદીચ્છેદાત્મનઃ સુખમ્ ॥ ૨૩॥

કવચસ્ય ચ દિવ્યસ્ય સહસ્રાવર્તનાન્નરઃ ।
દેવતાદર્શનં સદ્યો લભતે ન વિચારણા ॥ ૨૪॥

ઇતિ શ્રીમહાગણપતિ મન્ત્રવિગ્રહકવચં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishna Vallapareddy krishna321 at hotmail.com

*Shri Mahaganapati Mantravigraha Kavacham*
pdf was typeset on June 2, 2021

Please send corrections to *sanskrit@cheerful.com*